

अथनित्योत्सवनिबंधप्रारंभः

श्रीगणेशायनमः॥ नत्वानाथपरंपरांशिवमुखांविघ्नेश्वरंश्रीमहाराज्ञीतत्सचिवांतरीयपृतनानाथांत
देतःपरां॥ एषामाकृतिदेवताःपरिचितान्नाभिस्वजानिर्जरान्वीरांश्चप्रणयेनिबंधनामिदंनाम्नापिनित्यो
त्सवं॥१॥अंतेवसताशंभोरवतारेणाच्युतस्यषष्ठेन॥प्रकृतयतिकृत्यसूत्रंश्रीकूरमेणयत्रगदितोर्थः॥२॥
काश्यांश्रीत्रनूरशमित्यकविर्यःकविहारिणा॥नाथेनभासुरानंदनाथेनेहास्मयोजितः॥३॥यस्याद्य
द्योनास्तिभूमंडलांशोयस्यादासोविधतविधेतनशितीशः॥यस्याज्ञानंनैवशास्त्रंकिमन्यैर्यस्याकारः
सापराशान्करेव॥४॥भ्रष्टुरामस्रजालकभयप्रसरस्यमेहिजस्येह॥यंथिविमोकधुरीणंगुरुचर
णस्मरणमेवमार्गकरं॥५॥आसीतरुणयोवनश्रीरुतदंतोन्मनानवरुहारेयेः॥सूत्रोदितेस्तुसप्तमि
रुल्लासेराश्रितेहविश्रांतिः॥६॥येषुरीक्षागणेशस्त्रीश्यामाक्रोडीपराक्रमाः॥सामान्यश्चक्रमोन्ये
चक्रमेणप्रतिपादिताः॥७॥प्रतिपाद्येषुमुख्यत्वमंगतान्यच्चयद्भवेत्॥तत्सर्वंश्रीगुरोःक्रोडलालो
कैधिगम्यतां॥८॥न्यासोपसंहृतेरंगैप्रयुंजानस्यमेक्रमात्॥श्रीमप्रसादस्खलितंसमोदधतुताद्दृढं॥९॥

सूत्रसंसूचितानुक्तविरुद्धांगेनुकार्यतः॥तंत्रांतरात्संप्रदायादप्युक्तेहकचिद्भवेत्॥१०॥इहक्रमाण्यस
र्वेषांश्रीक्रमःप्रकृतिर्मता॥अतिरिच्यतमन्यत्रविशेषस्तुनिरूप्यते॥११॥श्रेयोर्थिनःसाधकस्यसांगे
श्रीसुंदरीक्रमे॥आवश्यकत्वात्प्रथमंदीक्षाविधिरुदीर्यते॥१२॥तस्यचकालनिर्णयोमंथानभैरवतं
त्रे॥वैशाखेसिद्धिदाक्षाश्रावणेसिद्धिदानृणां॥आश्विनेसर्वसिद्धिस्याद्कार्त्तिकेज्ञानवर्धिदा॥
शुभदामार्गशीर्षेचमाघेस्वर्गप्रदामता॥फाल्गुनेसर्वसिद्धिःस्यादन्येनिष्टफलप्रदाः॥२॥इतिसार
संग्रहेमलमासंविवर्जयेदित्युक्तं॥इहक्षयमासस्याप्युपलक्षणं॥तत्रैव॥रविवारेभवेद्दीक्षासोमे
शांतिर्भवेत्किल॥बुधेसौंदर्यमाप्नोतिज्ञानंस्याद्गुरुवासरे॥शुक्रेसौभाग्यमाप्नोतीति॥द्वितीया
यांभवेज्ज्ञानंतृतीयायांभवेच्छ्रियः॥पंचम्यांबुद्धिवृद्धिस्यात्सौख्यंस्यात्सप्तमीदिने॥दशम्यांरा
ज्यसौभाग्यंएकादश्यांशुचिर्भवेत्॥द्वादश्यांसर्वसिद्धिःस्यात्पूर्णिमासर्वसिद्धिदेति॥अस्वाध्या
यंविवर्जयेदिति॥अस्वाध्यायं॥संध्यागर्जितनिर्घोषभूकंपादिनिमित्तकान्॥अध्यायास्वसानित्यर्थः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्चिन्यांसर्वमाप्नोतिरोहिण्यांवाक्सतिर्भवेत्।।पुनर्वसौधनाढ्यःस्यात्पुष्येशत्रुविनाशनं।।मघायां दुःखहानिःस्याद्रूपतापूर्वफल्गुनी।।ज्ञानंचोत्तरफल्गुन्याहस्तायांचबलीभवेत्।।चित्रायांज्ञानसिद्धिः स्यात्स्वात्यांशत्रुविनाशनं।।अनूराधायुधिदध्येकीर्त्यैस्यातांततःपरे।।वृद्धिःशतभिषायांस्यात् पूर्वाभाद्रेसुखीभवेत्।।सौख्यंचोत्तरभाद्रायांरेवत्यांकीर्तिवर्धनमिति।।योगाश्चप्रीतिरायुष्मान् सौभाग्यःशोभनःशुभः।।सुकर्मोवधृतिर्बुद्धिध्रुवःसिद्धिश्चहर्षणः।।वरीयांश्चशिवःसिद्धोब्रह्मैंद्रोप्यमीशुभाः।।इतिच।।ववादिकरणजांतानिकरणानिशुभानिसद्यइतिच।।वेशंपायनसंहितायां।।मंत्रारंभणंमेषेधनधान्यप्रदंभवेत्।।कर्कटेसर्वसिद्धिःस्यात्कन्यालक्ष्मीप्रदायिनां।।तुलायांसर्वसिद्धिरयात्सर्वलाभश्चवृश्चिके।।मकरंपुत्रदंप्राहुःकुंभोधनसमृद्धिदः।।शुक्लपक्षेशुभादीक्षाकृष्णेप्यापंचमीदिनात्।।प्रतिकामेःसितेपक्षेमुक्तिकामेःसितेतरे।।अत्रचगुरुभार्गवमौढ्य चंद्रतारानुकूल्यंलग्नस्यग्रहबलादिकंचविचार्यं।।ग्रहबलंतु।।त्रिषडायगताःपापाशुभाःकेंद्रेत्रि

कोणगाः।।दीक्षायांतुशुभाःसर्वेध्रुवाःसर्वनाशकाः।।अथोक्तकालमंतरेणापिदीक्षार्हःकालोयथा।। तंत्रांतरे।।विषुवेप्ययनद्वंद्वेसंक्रांत्यांरमनोत्सवे।।दीक्षाकार्यातकालेपिपवित्रेगुरुपर्वणि।।विषुवेतुला मेषसंक्रमणयोरित्यर्थः।।अयनद्वंद्वे।।संक्रांत्यांतरन्यासुसंक्रांतिष्वित्यर्थः।।रमनोत्सवइतिचैत्रपूर्णिमा रिपुरमनकरणकदेवीपूजाहिनेष्वित्यर्थः।।पवित्रेश्रावणपूर्णिमादिष्वुदेव्याःपवित्रारोपणदिनेष्वित्यर्थ ः।।गुरुपर्वणिगुरोर्जन्मव्याप्तदिनयोः।।तथा।। षष्ठीमाद्यंदमासिकृष्णाश्विनचतुर्दशी।।कृष्णाकार्त्तिक्यायनोभयत्र।।कार्तिकेनवमीशुक्लामार्गेकृष्णाचपंचमी।।पौषेतुपूर्णिमाशुक्लामाघेचैवचतुर्थिका।।फाल्गुनेकादशीकृष्णाचैत्रेमासित्रयोदशी।।शुक्लपक्षेयातृतीयाज्येष्ठेदशहरास्मृता।।शुक्लदशमी।।आषाढेद्वादशीकृष्णाअमावास्याचश्रावणी।।इमानिदेवपर्वाणिकोटियज्ञफलानिवै।।दीक्षार्हाणीतिशेषः।।सौभाग्यवंद्रोदयेअस्मन्नाथचरणेर्वक्तुंदेवीपर्वाण्युक्तानि।।यथा।। मार्गांतेवाद्यमासेषुचैत्रेशुक्लात्रयोदशी।।चतुर्दश्यपिशुक्लाथवैशाखेशुक्लपक्षगा।।तृतीयैकादशीपा

र्णमास्या कृष्णा चतुर्दशी॥ ज्येष्ठे शुक्लदशमीरा का कृष्णा चतुर्दशी॥ आषाढे शुक्लपक्षरूपं चमी चत्र
योदशी॥ श्रावणे मासि शुक्ला का दशी शुक्ला चतुर्दशी॥ कृष्णापं चम्यष्टमी चरोहिणी सहितायदि॥ नवमी
चाथभाद्रस्य कृष्णा षष्ठी तथा ष्टमी॥ रोहिणी सहिता चेत्स्यादाश्विने सप्तमी सिता॥ अष्टमी चसिता कृ
ष्णा पक्षरुद्रा चतुर्दशी॥ शुक्ल कार्तिके शुक्लपक्षस्येनवमी हादशी तिथी॥ मार्गशीर्षे तृतीया चषष्ठी धवल
पक्षगे॥ पौषे चतुर्थी नवमी चतुर्दश्यः सिता मताः॥ दशमी त्वसिता माघे चतुर्थ्येका दशी सिते॥ चतुर्दश्यं
सिता चाथफाल्गुने शुक्लपक्षगे॥ षष्ठी नवम्यो कृष्णा तुभवेदेका दशी तथा॥ इतिचरत्नावली कुलोड्डीशे
यामलाद्यर्थसंग्रहइति॥ स्वतीर्थेकृविधुयासेपुण्यारण्येवनेशुचा॥ मंत्रदीक्षां प्रकुर्वाणो मासदर्शादिनशोध
येत्॥ प्रकारांतरंच॥ सर्ववाराग्रहाः सर्वेनक्षत्राणि चराशयः॥ यस्मिन्नहनि संतुष्टो गुरुः सर्वेशुभावहाः॥ सं
तुष्टेचगुरौतस्य संतुष्टाः सर्वदेवताः॥ गुरुं संतोषयेद्भक्त्याहयमेवतराभवेत्॥ हयंभोगमोक्षौ एवकारोत्थ
र्थः॥ अधिकारिभेदेनकालोयथा॥ मुमुक्षूणांसदा कालः स्त्रीणां कालस्तुसर्वदेति॥ ॥अथगुरुशिष्यलक्षणं॥

तंत्रराजे॥ सुंदरः क्षमुखः स्वच्छः सुलभो बकृतंत्रवित्॥ असंशयः संशयछिन्निरपेक्षो गुरुर्मतः॥ सौंदर्य
मनवद्यत्वंरूपेसुमुखतापुनः॥ स्मरपूर्वाभिभाषित्वंस्वच्छता जिह्मदृष्टिता॥ सौलभ्यमप्यगर्वित्वंसंतो
षो बकृतंत्रता॥ असंशयस्तत्त्वबोधः स्वछिन्नस्तिपादनात्॥ रैनैपेक्ष्यमविक्षेपोगुरुत्वंहितवेदिता॥
एवंविधोगुरुर्ज्ञेयस्तितरः शिष्यदुःखदः॥ अजिह्मतेतिछेदः॥ बकृतंत्रता बकृतंत्रवेदितेत्यर्थः॥
तथा चतुर्भिराद्यैः संयुक्तः श्रद्धावान्सुस्थिराशयः॥ अलुब्धः स्थिरगात्रश्च प्रेक्ष्यकारी जितेंद्रियः॥ आस्ति
कोदृढभक्तिश्चगुरोर्मंत्रेसदैवते॥ एवंविधोभवेच्छिष्यइतरोदुःखकृद्गुरोरिति च॥ चतुर्भिराद्यैरितिसुं
दरत्वादिभिः॥ अन्यान्यपितल्लक्षणानिकुलार्णवादिकृतंत्रेषुबकुलमुपलभ्यमानानिगौरवभियात्रे
हलिखितानि॥ शिष्यपरिक्षाकालोपितत्रैव॥ एकद्वित्रिचतुःपंचवर्षाण्यालोच्ययोग्यतां॥ भक्तियुक्तो
गुणांश्चापि क्रमाद्वर्षासरंकरे॥ पश्चादुक्तक्रमेणैव वरेद्विद्यामनन्यधीरिति॥ ससंकरेअनुलोमजातिस
हितेवर्णेब्राह्मणादिरर्णेत्यर्थः॥ एकवर्षेब्राह्मणस्ययोग्यतापरीक्षा॥ क्षत्रियादिपुनर्द्व्यादिवत्सरपरी
क्षेत्यर्थः॥ एवमुक्तान्यतमकालेऽकृतलक्षणोगुरुरुक्तलक्षणंपरीक्ष्यशिष्यंदीक्षयेत्॥ तत्रनिर्वर्त्तितस्ना

ननित्यविधिः साधको वाद्यघोषपुरःसरं॥ ब्राह्मणः स्वस्तिवाचयित्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रेयस्कामोहममुकविद्याग्रहणार्थं ममुकगुरोर्दीक्षां ग्रहिष्यामीति संकल्प्य सोपहारो गुरुमुपसृत्य दंडवत्प्रणम्य तत्तनुज्ञया पुनर्देशकालौ संकीर्त्यामुकगोत्रो ममुकशारदाध्याय्यमुकशर्मवर्मादिरहं चतुर्विध पुरुषार्थसिध्यर्थं श्रेष्ठमनुग्रहणायामुकगोत्रममुकशारदाध्यायिनममुकशर्माणं त्वां गुरुत्वेन वृणेइति कमुकादिना गुरुं वृणुयात्॥ स च वृतोस्मीत्युक्त्वा सशिष्यैः सामयिकैः सहगो मयोपलिप्त संरंगवल्लीपुष्पमालावितानकाद्यलंकृतमंडपविविक्तदीक्षाप्रदेशमासाद्य पादौ प्रक्षाल्याचम्य मंडपांतः प्रविश्य वक्ष्यमाणविधिनासनउपविश्य कृतभूतशुद्धिप्राणप्रतिष्ठाकश्च वक्ष्यमाणप्रकारेणगणपतिलक्षिताश्यामावार्तालीपराणांपंचानां देवतानांकांडानुसमयेनवा यागमंदिरध्वेशादिचक्रपूजांतं १ तदादिविघ्नोत्सारणांतं॥ २ तदादिन्यासांतं३ तदादिपात्रासादनांतं ४ तदादिस्थंडिलयागपूजांतं ५ तदाद्यावरणार्चनांतं ६ तदादिसौभाग्यहृदयार्चनांतं ७ तदादिहवनांतं ८ तदादिहविःप्रतिपत्त्यंतं ९ तदादिदेवतोद्वासनांतं १०॥ तदादिविशेषार्घ्यविसर्जनांतेषुपदार्थेषुयागगृहप्रवेशादि



हवनांतंपदार्थानुसमयेनवा क्रमंप्रवर्त्य तरुणोल्लासवान्शिष्यमाकूयनूतनेनवाससासंस्यमुखंबध्वागणपत्यादिमूलमंत्रानुच्चारयन्पात्रपंचसामान्यार्घ्योदकेबिंदुभिस्तमभ्युक्ष्यत्रैपुरतंत्रसिद्धांतंश्रावयेत्॥ यथा॥ पृथिव्यप्तेजोवायुर्वियंतिभूतानिपंच॥ गंधरसरूपस्पर्शशब्दतन्मात्राणिपंचचउपस्थपायुपादपाणिवाक्कर्मेंद्रियाणिपंच॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रज्ञानेंद्रियाणिपंच रजःसत्वतमोरूपाण्यहंकारबुद्धिमनांस्यंतःकरणवृत्तित्रयं प्रकृतिर्गुणसाम्यरूपंचिनंपुरुषोजीवःपरमशिवगताःस्वतंत्रतानित्यतानित्यतृप्ततासर्वकर्तृतासर्वज्ञतारव्याधर्मीएवसंकुचिताःसंतोजीवेक्रमान्नियतिकालरागकलाविद्याशक्त्याख्यामवंति॥ मायाजगत्परमशिवयोर्भेदबुद्धिः॥ शुद्धविद्यातयोरभेदधीः॥ जगदिदंतयापश्यन्परमशिवएवेश्वरः॥ तदहंतयापश्यन्सएवसदाशिवः॥ शक्तिःपरमशिवस्यजगत्सिसृक्षातद्वान्सएवसदाशिवः॥ शक्तिःपरमशिवस्यजगत्सिसृक्षातद्वान्सएवतत्वेषुप्रथमतत्वरूपःशिवः॥ इतिषट्त्रिंशत्संख्यान्येवैतद्दर्शनप्रमेयजातं॥ एतदात्मकंविश्वमेवपरमशिवशरीरं॥ प्राग्युक्तनियत्यादितत्वपंचकाव्यापरपर्यायेणलीलास्वीकृतेवकंचुकेनावृतस्वरूपईश्वरएवजीवः निर्मुक्तःपरमशिवःस्वस्वरूपावबोधः

पुरुषार्थः॥ शब्दवर्णात्मकानित्यास्त्र॥ मंत्राणामन्यादृशंसामर्थ्यं॥ स्वगुरुपरंपरैकदेशगम्यधर्मरूपेणसंप्रदायेनगुरुशास्त्रदेवतासुविश्वासेनचसर्वाःसिध्यंति॥ एतच्छास्त्रप्रामाण्यंविश्वासैकमधिगम्यं॥ गुरुमंत्रदेवतात्मनांश्रीगुरुरूपेणैक्यविभावनात्मनःपवनयोरैक्यलक्षणनिरोधस्यज्ञानाच्चप्रत्यगात्मवेदनं॥ स्वरूपानंदाभिव्यंजकैःपंचमकारैरर्चनमुपकरे॥ आकृष्टाःनिरयः॥ भावनाराज्यानियहानुग्रहसामर्थ्यलाभः॥ दर्शनांतराणामनिंदनं॥ स्वोपास्यदेवतामंतराकाक्षिमहत्बुध्यभावः॥ सच्छिष्यएवरहस्यप्रकाशनं॥ सदास्वोपास्यमंत्रानुसंधानं॥ संततंशिवोहमितिभावनं॥ कामक्रोधलोभमोहमदमात्सर्याणामविहतहिंसायाश्चौर्यस्यजनविरोधस्यस्त्रियाविद्वेषस्यविद्विषस्यचवर्जनं॥ सर्वज्ञस्यैकस्यगुरोरुपास्तिः॥ गुरुवाक्यशास्त्रादौसर्वत्रासंशयः॥ सैकोपभोगबुध्याधमाद्यर्जनं॥ फलमनभिसंधायकर्माचरणं॥ अलोपःस्ववर्णाश्रमोक्तानांनित्यानांकर्मणां॥ मपंचकस्यालाभेपिनित्यसपर्यानिर्वर्तनं॥ वैधानुष्ठानेसर्वतोनिर्भयता॥ शक्तौसिद्धेसर्वेहविः॥ इंद्रियाण्येवस्रुचः॥ संकोचेनस्वात्मरक्षिताःसर्वज्ञत्वसर्वकर्तृत्वाद्यः परमशिवशक्तयएवज्वालाः॥ स्वात्मशिव

एवपावकः॥ स्वयमेवहोता॥ निर्गुणब्रह्मापरोक्ष्यंफलं॥ स्वपारमार्थिकस्वरूपलाभान्नपरंविद्यते॥ सेयमेतच्छास्त्रमर्यादा॥ वेश्याइवप्रकृतेदारयाविद्याः॥ सर्वेषुदर्शनेषुगमेयंविद्या॥ तत्रसर्वथामतिमान्दीक्षेतेति॥ अथशिष्यस्यशिरसिकामेश्वरीकामेश्वरयोरुभुक्लप्तस्यचरणन्यासंभावयित्वा॥ तदमृतक्षरणेनतस्यबाह्यमांतरंचमलंदूरीकुर्यात्॥ एषाचरणरूपविन्यासाशांभवीदीक्षा॥ अथशिष्यस्यामूलाधारमाब्रह्मरंध्रंप्रज्वलंतीज्वलदनलनिभांपरविद्युत्प्रकाशलहरींध्यात्वातत्किरणैस्तस्यपापपाशान्दहेत्॥ इत्यंशांभवप्रवेशनरूपाशाक्तीदीक्षाभवति॥ यामिंडीमरीचपिप्पलीहरीतकीधात्रीफलबिभीतकलवंगलालवंगपत्रनागकेसरतक्कोलमहत्यंतीसहदेवीसंज्ञानांत्रयोदशानांवस्तूनांचूर्णमित्रेणदूर्वाभिस्मभ्यांगजाश्वशालचतुष्पथवल्मीकमहीसंगमह्रदगोष्ठसमानीमाभिःसप्तभिर्मृत्तिकाभिश्चोपेतेनचंदनकाश्मीररोचनाकर्पूरैश्चतुर्भिःसुरभिजलेनश्वेतनासालिलेनपूर्णंनवीनवासोयुगवेष्टितंईशानतःशालितंडुलपुंजोपरिनिहितंनूतनकलशमाग्नेयादिदिक्षुमध्येप्रागादिदिक्षुचबालषडंगेनाभ्यर्च्य

तदंतर्लिखितश्यामावाराहीणांचक्राणिविनिक्षिप्यतत्रपुनस्तारितस्त्रीरेवतास्त्रिस्तत्तन्मूलेनतत्तदावरणा
निचतत्तन्मंत्रैःसमभ्यर्च्यकुंकुमस्त्र्यमंत्रेणसंरक्ष्यप्रदर्श्यधेनुयोनिमुद्रेचक्राणियथास्थानमवरुद्धापयेत्।।
ततःसक्षीरेणसिंदूरकुंकुमाद्यैश्चंदनादिपीठमातृकायंत्रंविलिख्यतत्रशिष्यंनिवेश्यतेनकुंकुमांभसा ल
लितश्यामावार्तालीमूलविद्यामिःस्नपयेत्।।मातृकायंत्रंतु।।व्योमेंदौरसनार्णकर्णिकमचांहृद्यैःस्फुरत्केसरंष
त्रांतर्गतपंचवर्गप्रशालाक्षा।त्रिवर्गैःक्रमात्।।आशाश्चक्षिप्तलांतलांगलियुताक्षोणीपुरेणावृतंवर्णाब्जंशिरः
स्थितंविषगदप्रध्वंसिमृत्युंजयं।।अस्यार्थः।।व्योमहकारः ईंदुःसकारःओइतिरूपंरसनार्णःविसर्गःएतत्
पंडःकर्णिकायांयस्यतथोक्तं।क्रमात्प्राच्यादिवइत्यर्थः।अचांअकारादिविसर्गीतानांषोडशानांस्वराणांहृ
द्यैःअंआंइत्यादिभिर्लिखितैरितिशेषः।।स्फुरंतःकेसरादलद्वयमध्यभागाअष्टोयस्यतथोक्तं।।पत्रा
णांदलानामंतरभ्यंतरेगतालिखिताः।।पंचवर्गाःकचटतपादीनियंचपंचाक्षराणियशलाक्षाःयाद
वांतशादिहांतकसात्मकाःत्रिवर्गायस्यतथोक्तं।।आशासुप्राच्यादिषुआशिषुआग्नेय्यादिकोणेषुव
क्रमाल्लांतेनवकारेणलांगलिनाढकारेणयुज्यतइतितथोक्तेनक्षोणीपुरेणचतुरस्रेणावृतं।।वर्णाब्जं

मातृकापद्मंशिरसिस्थितंभावितंसहितिशेषः।।विषगदप्रध्वंसी।विषरोगयोःप्रध्वंसनशीलं।।अं
ततोमृत्युंजयंचभवतीत्यर्थः।।एतल्लेखनप्रकारोयथा।।चतुरस्रालंकृतंसकेसरमष्टदलकमलंवि
लिख्यतत्कर्णिकायांहकारसकारोकारविसर्गात्मकंबीजंतत्केसरेषुप्राच्यादितःअकारादिस्वरद्व
यद्वयंदलोदरेषुकचटतपयशलारव्यवर्गाष्टकंचतुरस्रस्यबाह्यतः प्रागादिदिक्षुवकारंआग्नेय्यादि
विदिक्ष्वंतष्टेवर्णंविलिखेत्।।सर्वेषामक्षराणांसबिंदुकलंसप्रणवादिति।।ततःपरिहितडूकूलंसु
रभिचंदनानुलिप्तांगंमल्लिकादिमाल्यधारणंसुप्रसन्नंशिष्यंपार्श्वेनिवेश्यवक्ष्यमाणप्रकारेण
तद्गेहकारादिदिक्कारांतैकपंचाशन्मातृकान्यासंविधायविमुखबंधवाससस्तस्यहस्तेक्रमात्त्रीन्
प्रथमासिक्तांश्चंदनाक्षितान्द्वितीयखंडान्पुष्पखंडांश्चनिक्षिप्यवक्ष्यमाणेस्तत्वमंत्रैर्गोसयित्वाथगुरु
स्तस्यदक्षिणकर्णेललिताक्रमेवक्ष्यमाणंश्रीविद्यागुरुपादुकामंत्रंउपदिश्यबालामुपादिशेत्।।तत्रअ
मुकपदस्थाने स्वस्यस्वशक्तेश्चदीक्षानाम्नोच्चारणं।स्त्रीणांतुवाग्दीक्षासंवादिताअन्यैतितंत्रसारस्थितं।।

वा क्रीक्षा मंत्रोपदेशः॥ एषामांत्रीदीक्षा॥ इथमुक्तदीक्षात्रयमेकप्रयोगणेकस्मिन्नेवकाले रुद्यादितिमु
ख्यः पक्षः॥ सर्वस्मिं कुर्यादितिसूत्रात्॥ कतिपयकालव्यवधानेनक्रमादेकामेका मेववेतिगौणः॥ ए
केकांचेत्येकइतिसूत्रात्॥ एवमिदंदीक्षात्रयंनिर्वर्त्य पश्चात्तस्मादृष्टमंत्रंदद्यात्॥ ततोगुरुः शिष्यशि
रसिस्वचरणौनिवेशय॥ इष्टमंत्रक्रमोपयुक्तान्सर्वानंगमंत्रांस्तस्मिन्नेवकाले क्रमेणवायथाधिका
रमुपदिश्यस्वांगेषुकिमप्यंगं शिष्यंस्पर्शयित्वातदंगमातृकाक्षराद्यंद्व्यक्षरंव्यक्षरंचतुरक्षरं
वाऽनंतनाथशब्दांतंतस्यनामकृत्वादशमरंध्रोक्तानाचारान्नुशिष्यात्॥ यथा॥ व्यवहारंदर्शनंच्च
स्यस्वात्म्यबलसहायामथवयांसिचप्रविचार्यैवपंचमाःस्वीकर्तव्याः॥ सर्वैःप्राणिभिःअविराद्ध्य
उपासनापरिपंथिनोविनिगृहीतव्याः॥ आश्रिताअनुगृहीतव्याः श्रीगुरुवत्गुरोःपुत्रेकलत्रेज्येष्ठास्वव
वर्तितव्यं॥ मकारत्रितयेतिकर्तव्यता॥ गुरुशास्त्रसांप्रदायतोज्ञातव्या॥ सर्वस्मिन्विषयेवचनपूर्वकमेवप्र
वर्तितव्यं॥ दशकुलवृक्षानछेत्तव्याःतेचश्लेष्मातककरंजाक्षनिंबाश्वत्थकदंबकाः॥ बिल्वोदुंबरौच

तिंत्रेणीतिदशस्मृताइति॥ स्त्रीहंसीरकलशसिंधलिंगविविधक्रीडाकुलकुमारीकुलसत्कारशोकैक
तरुपिहस्तवनमत्तवारांगनारक्तांशुकामत्तेभान्दृष्ट्वावंदितव्यं॥ कृष्णाष्टमीचतुर्दशीदर्शपूर्णिमा
संक्रमणाख्येषुपंचसुपर्वसुविशेषतोनेभिन्नकीवरिवस्याकर्तव्या॥ साधकस्यारभ्यतरुणयौवनप्रो
ढतरंतोन्मनानवस्त्रारव्येषुसप्तसप्तासेषुप्रौढोल्लासांतमेवहविःप्रतिपत्तिः॥ समयाचाराश्चप्रव
र्तेरन्॥ ततःपरांदशांप्राप्तानांस्वैरचारित्वं॥ तत्रतादृशावीरा॥ वीरव्यवहारधन्यथासंभावनयाअथः
पतेत्॥ अतस्तथानाचरेत्॥ रक्तायास्त्यागंविरक्तायाहट्टादाक्रमणमुदासीनायाधनादिनाप्रलोभनं
वर्जयेत्॥ करुणाशंकाभयलज्जाजुगुप्साकुलजात्यभिमानशीलानिक्रमेणत्यजेत्॥ विहितहिंसा
दौकरुणादीनांप्रातिकूल्येनतत्तत्यागउक्तइतिभावः॥ गुरुपरमगुर्वोःसममागमनेप्रथमंगुरुप्रणमत्
॥ तदग्रेगुर्वनुमत्यातन्नतिंप्रकल्पयेत्॥ पुज्येषुनपराङ्मुखोभवेत्॥ मुख्यतयास्वप्रकाशमात्मान
मनुसंदध्यात्॥ शरीरमर्थमस्तूंश्चगुरवेधारयेत्॥ तदुक्तंकुर्यात्॥ तद्दत्तमित्युक्तायुक्तंनविचारयेत्॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रयेत्त्रयवस्थांतन्यात्॥सत्यंवदेत्॥परधनंनस्पृहयेत्॥आत्मस्तुतिंपरनिंदांमर्मस्पृग्वचनंपरिहासंधिः
कारमाक्रोशंत्रासोत्पादनंचनाविदध्यात्॥सर्वप्रयत्नेनपरदेवताराधनद्वारापूर्णज्ञानात्मकब्र
ह्मभावमधिलपेत्॥एतान्यंत्र्यमन्वादिभिरुक्तानेतद्विरुद्धानाचारानंगीकुर्यात्॥इत्थंविदित्वा
विधिवत्तु॥तष्ठन्कुलधर्मानिष्ठः सर्वथाकृतकृत्योभवति॥तस्यशरीरत्यागेश्वपचगृहंवाकाशीति
नाविशेषः॥सतुश्जीवन्मुक्तएवेति॥ततोहेहेयादिविलक्षणमवस्थात्रयसाक्षिसच्चिदानंदात्मकं
प्रत्यंगभिन्नंब्रह्मैवत्वमसीतिशिष्यायात्मतत्त्वमुपदिश्यललिताश्यामावार्त्तालीवियामिस्त
दंगंत्रीन्परिमृज्यपरिष्यतंमूर्ध्न्युपाघ्रायस्वमिवशिष्यमपिपरविद्रूपंकुर्यात्॥सोपिश्रीगुरूपदि
ष्टेनप्रकारेणक्षणमात्मनःपूर्णतांभावयित्वाकृतार्थःसन्यथाविभवंश्रीगुरुंवसुवस्त्राभरण।
दिभिराराध्यं॥तस्माद्धितवेदितव्यरहस्यज्ञातोऽशेषमंत्राधिकारीभवेत्॥ततोगुरुर्हविःप्रतिपत्या
दिशेषाध्यविसर्जनांतंविधिशेषंनिवर्तयेत्॥अनेनैकस्मिन्नेवकालेसमुच्चितेनवान्यतमेनैकेनवा
कालभेदेवा॥अनेनैवदीक्षाविधिनागणपत्यादीनांउक्तानांयंत्रानांदेवतानामपिक्रमानुष्ठानंभवति॥

ख

नतुपृथक्पृथक्दीक्षणं॥सामान्यपक्षेत्युक्तंतन्मंत्रमात्रोपासकस्यतुपृथक्पृथगेवदीक्षाबालोपासकस्यतुमं
त्रदीक्षात्मतयाबालाऽपदेशएवेष्टमनुक्तेनाप्युपदेशोज्ञेयः॥ललितांगत्वेनश्यामादीनांतिसृणामुपास्तेः क
तानुक्तत्वज्ञापकान्तरकरणपक्षेगणपतेर्ललितोवायास्वक्रमंप्रवर्त्योभयोरेवपात्राण्यासाद्यरा॥चक्रराज
मात्रंकलशेनिक्षिप्यश्रीविद्ययाकेवलंशिष्यस्नपयित्वातदंगंचपरिमृज्यशेषमशेषमनुतिष्ठेत्॥गण
पतिश्यामादीनामन्यासांचदेवतानांस्वातंत्र्येणैकैकोपास्तौतुतत्तत्क्रममात्रंप्रवर्त्यतत्तत्पात्रेआसा
द्यतत्तद्यंत्रंकुंभेनिक्षिप्यतत्तन्मंत्रेणस्नानांगपरिमार्जनेकृत्वैवाशेषमविशिष्टमितिविवेकः॥सुंद
रीमहादेयेतु॥अस्यांचदीक्षायांत्रैवर्णिकस्येवाधिकारः॥सर्वशास्त्रार्थवेदार्थज्ञानिनोरुद्रतायच्चाही
क्षोद्यतिर्मूलेधिकार्युक्तोरितिलिखितं॥शक्तीनांतुश्रीरुद्रमंडलांतर्दीक्षनस्नापकबलेवस्त्येवाधिकारइतिरहस्य
मितिशिवं॥ ॥इतिश्रीभास्करानंदनाथचरणारविंदमिलिंदायमानमानसेनोमानंदनाथेननिर्मितेऽ
भिनवैकल्पसूत्रानुसारिणिनित्योत्सवेनिबंधेदीक्षासमारंभनिरूपणोनामारंभोल्लासःप्रथमःसंपूर्णः॥

ज्ञानार्णवतंत्रे ५ ओघत्रयं। ५